काष्ठसिंहः। सक्तुसैन्धवः। पानसैन्धवः। धान्यं गौरिव इति विगृह्य व्याघ्रादेराकृतिगणत्वाद् उपमितं व्याघ्रादिभिः (२.१.५६/७३५) इति समासः। उपमानार्थोऽपि यथासम्भवं यथाप्रसिद्धि च योजयितव्यः। गवाकृत्या [1]संनिवेशितं धान्यं धान्यगवशब्देनोच्यते। उपमाने इति किम्? परमसिंहः॥

## अके जीविकार्थे। (७३/३८०७)

अक[2]प्रत्ययान्ते उत्तरपदे जीविकार्थवाचिनि समासे पूर्वपदमाद्युदात्तं भवति। दन्तलेखकः। नखलेखकः। अवस्करशोधकः। रमणीयकारकः। दन्तलेखनादिभिर्येषां जीविका त एवमुच्यन्ते। 'नित्यं क्रीडाजीविकयोः' (२.२.१७/७११) इति समासः। अके इति किम्? रमणीयकर्ता। जीविकार्थे इति किम्? इक्षुभक्षिकां मे धारयसि॥

## प्राचां क्रीडायाम्। (७४/३८०८)

[3]प्राग्देशवर्तिनां या क्रीडा तद्वाचिनि समासे अकप्रत्ययान्ते उत्तरपदे पूर्वपदमाद्युदात्तं भवति। उद्दालकपुष्पभञ्जिका। वीरणपुष्पप्रचायिका। शालभञ्जिका। तालभञ्जिका। 'सञ्ज्ञायाम्' (३.३.१०९/३२८६) इति [4]ण्वुल्। 'नित्यं क्रीडाजीविकयोः' (२.२.१७/७११) इति षष्ठीसमासः। प्राचाम् इति किम्? जीवपुत्रप्रचायिका। इयमुदीचां क्रीडा। क्रीडायाम् इति किम्? तवपुष्पप्रचायिका। पर्याये ण्वुच्प्रत्ययो भवति॥

## अणि नियुक्ते। (७५/३८०९)

अणन्ते उत्तरपदे नियुक्तवाचिनि समासे पूर्वपदमाद्युदात्तं भवति। छत्रधारः। तूणीरधारः। [5]कमण्डलुग्राहः। भृङ्गारधारः। नियुक्तोऽधिकृतः, स च कस्मिंश्चित् कर्तव्ये तत्परो न भवति इति [6]नियुक्तः इत्यनेन सिध्यति। नियुक्तः इति किम्? काण्डलावः। शरलावः॥

## शिल्पिनि चाकृञः। (७६/३८१०)

शिल्पिवाचिनि समासे अणन्ते उत्तरपदे पूर्वपदमाद्युदात्तं भवति, स चेदण् कृञो न भवति। तन्तुवायः। तुन्नवायः। वालवायः। शिल्पिनि इति किम्? काण्डलावः। शरलावः। अकृञः इति किम्? कुम्भकारः। अयस्कारः॥

---

1. अवस्थितम् ड.ह.ग. 2. प्रत्ययान्ते नास्ति फ. 3. प्राग्देशवर्तिनी क. 4. वुञ् क. 5. कमण्डलुग्राहः नास्ति फ. 6. नियुक्ते फ.